**SEMESTER -II MAHATMA GANDHI UNIVERSITY M.A. PROGRAMME IN SANSKRIT VEDANTA COURSE VIII- CORE – VIII -MIMAMSA (MANAMEYODAYA -Meya Portion)**
**Course code SA040203**

1. मानमेयोदयः कस्य दर्शनस्य प्रतिपादकः ग्रन्थः भवति?
   a. मीमांसा
   b. वेदान्तः
   c. न्यायः
   d. बौद्धः
2. मानमेयोदयः इति शीर्षके मानपदस्यार्थः कः?
   a. अभिमानः
   b. आत्मा
   c. प्रमाणं
   d. परिमाणः
3. मानमेयोदयस्य प्रणेतारः कस्यां सरण्यां अन्तर्भवन्ति?
   a. भाट्टसरण्यां
   b. गौतमसरण्यां
   c. प्राभाकरणसरण्यां
   d. मुरारिसरण्यां
4. मानमेयोदयस्य प्रमेयभागस्य कर्ता कः?
   a. कुमारिलभट्टः
   b. प्रभाकरगुरुः
   c. मेल्पुत्तूर् नारायणभट्टतिरिः
   d. नारायणपण्डितः
5. मानमेयोदये द्रव्यलक्षणं किम् ?
   a. नित्यं
   b. परिमाणगुणाधारं
   c. परिणामिनित्यं
   d. गुणाश्रयं
6. कुमारिलमते कति द्रव्याणि सन्ति ?
   a. पञ्च
   b. नव
   c. एकादश
   d. सप्त
7. आत्मभोगायतनं…………………?
   a. प्राणः
   b. शरीरम्
   c. यज्ञः
   d. देवता
8. सलिललक्षणं किम् ?
   a. शीतस्पर्शवत्वम्
   b. अभास्वरशुक्लगुणवत्वम्
   c. तेजोजन्यत्वम्
   d. स्वाभाविदद्रवत्वाधिकरणत्वम्
9. तत्पुनरुद्भूतानुद्भूताभिभूतभेदेन त्रिविधौ। कौ?
   a. पाणिपादौ
   b. रूपस्पर्शौ
   c. तेजोवायू

d. सुखदु:खौ

10.अरूपत्वे सति ................ वायुः।

a. गन्धवान्
b. रसवान्
c. स्पर्शवान्
d. परिमाणवान्

11.वायुः प्रत्यक्षः महत्वानिन्दि्रयत्वे सति स्पर्शवत्त्वात् भूतवत्त्वात् वा घटवत् इत्यनुमानप्रयोगे साध्यं किम् ?

a. प्रत्यक्षत्वम्
b. महत्वम्
c. अनिन्दि्रयत्वम्
d. वायुत्वम्

12.शास्त्रविचारे अधोलिखितेषु किं पण्डितैः स्वीकि्रयते?

a. कल्पनालाघवम्
b. वर्णनालाघवम्
c. कल्पनागौरवम्
d. वर्णनागौरवम्

13.मानमेयोदये तमसः लक्षणं किम् ?

a. नीलगुणत्वे सति अन्धत्वम्।
b. अस्पर्शत्वे सति रूपवत्वम्।
c. परिमाणत्वे सति अप्रमेयत्वम्।
d. आलोकाभावजन्यत्वे सति तद्भावे विनाश्यत्वम्।

14.यद्यत् स्पर्शवान् तत्तद्रूपवान् इति पूर्वपक्षप्रयुक्ता व्याप्तिः कुत्र व्यभिचरति?

a. तमसि
b. मनसि
c. वायौ
d. आकाशे

15. द्रव्यान्तरं तमः नीलात्मकत्वात् नीलोत्पलनैल्यवत् इत्यत्र व्याप्तिः का?

a. यत्र नीलात्मकत्वं तत्र नीलोत्पलनैल्यवत्वम्
b. यत्र नीलात्मकत्वं तत्र द्रव्यान्तरत्वम्
c. यत्र द्रव्यान्तरत्वं तत्र तमस्त्वम्
d. यत्र तमस्त्वम् तत्र नैल्यवत्वम्

16.एतानि पञ्चावयविद्रव्याणि। कानि?

a. पृथिवी, सलिलं, तेजः, पवमानः, तमः
b. व्योम, कालः, दिक्, आत्मा, मनः
c. पृथिवी, कालः, तेजः, आत्मा, मनः
d. तेजः, पवमानः, कालः, आत्मा, दिक्

17.मनुष्यादिशरीरम्?

a. अण्डजम्
b. जरायुजम्
c. स्वेदजम्
d. उद्भिज्जम्

18.जालरन्ध्रविसरद्रवितेजोजालभासुरपदार्थविशेषाः के?

a. प्राणाः
b. मशकाः
c. परमाणवः
d. रजांसि

19.न्यायमते क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत् इत्यनुमानं कस्य प्रमाणम् ?

a. परमाणुसद्भावस्य

b. ईश्वरसद्भावस्य
c. तमसः सद्भावस्य
d. प्रपञ्चसद्भावस्य

20. उपादाननिमित्तासमवायिभेदेन त्रिविधं हि ..............?
a. पुण्यम्
b. अदृष्टम्
c. कारणम्
d. कार्यम्

21. मीमांसकमते प्रपञ्चस्य आत्यन्तिको विनाशो न भवति? कुतः?
a. अकर्तृत्वसाधनात्
b. पाञ्चभौतिकत्वात्
c. परमाणुजन्यत्वात्
d. परिणामित्वात्

22. वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् भारतादिवाक्यवत् इत्यनुमाने भाट्टैः कौ हेत्वाभासौ ओरोप्येते?
a. सोपाधिको विरुद्धश्च।
b. बाधितः अनैकान्तिकश्च।
c. असिद्धः बाधितश्च।
d. सन्दिग्धानैकान्तिकः व्यर्थविशेश्यासिद्धश्च।

23. वक्त्रेभ्यो वेदास्तस्य निःसृताः इत्येतानि वाक्यानि वेदस्य पौरुषेयत्वसाधकानि न भवन्ति। कुतः?
a. एतानि वाक्यानि न श्रौतानि।
b. एतानि वाक्यानि अर्थवादवाक्यानि।
c. एतानि वाक्यानि अर्थान्तरे प्रयुक्तानि।
d. एतानि वाक्यानि अपौरुषेयत्वसाधकानि।

24. मीमांसकाभिप्रायेण प्रमाणानां प्रामाण्यं कथम् ?
a. प्रामाम्यं अप्रामाण्यं च स्वतः
b. प्रामाण्यं परतः अप्रामाण्यं तु स्वतः
c. प्रामाण्यं अप्रामाण्यं च परतः
d. प्रामाण्यं स्वतः अप्रामाण्यं तु परतः

25. 'प्रामाण्यं अप्रामाण्यं च परतः' इति के वदन्ति?
a. वेदान्तिनः
b. सांख्याः
c. तार्किकाः
d. बौद्धाः

26. प्रामाण्यं अप्रामाण्यं च स्वतः इति के वदन्ति?
a. प्राभाकराः
b. नैय्यायिकाः
c. कणादाः
d. सांख्याः

27. अप्रामाण्यं स्वतः प्रामाण्यं परत इति के वदन्ति?
a. द्वैतिनः
b. विशिष्टाद्वैतिनः
c. बौद्धाः
d. वैशेषिकाः

28. विवादपदानि द्रव्याणि नित्यानि निरवयवद्रव्यत्वात् आत्मवत् इत्यनुमानेन कस्य मतस्य निरासः उद्दिश्यते?
a. शाङ्करमतम्
b. बौद्धमतम्

c. सांख्यमतम्
d. द्वैतमतम्

29. दिक्कालाकाशानां प्रत्यक्षत्वसमर्थनानुमाने मीमांसकैः उक्तः हेतुः कः?
a. रूपवत्त्वे सति भौतिकत्वात्
b. अमनस्त्वे सति विभुत्वात्
c. परिमाणवत्वे सति सर्वगतत्वात्
d. इन्द्रियवेद्यत्वे सति अपरोक्षत्वात्

30. कालः केन इन्द्रियेण गृह्यते?
a. चक्षुषा
b. श्रोत्रेण
c. त्वचा
d. षड्भिरिन्द्रियैरपि

31. पूर्वापरादिप्रत्ययानि ..........मात्राधीनानि।
a. नेत्र
b. श्रोत्र
c. मनः
d. जिह्वा

32. विभोः आकाशस्य 'घटाकाशः' इत्यादि व्यपदेशः कुतः?
a. भ्रमवशात्
b. उपाधिवशात्
c. प्रतीतिवशात्
d. सङ्कल्पवशात्

33. मीमांसकाभिप्रायेण आत्मा......................?
a. शरीराश्रयः
b. चित्ताश्रयः
c. प्रकृत्याश्रयः
d. चैतन्याश्रयः

34. मीमांसकाभिप्रायेण आत्मा.........................?
a. अनुमानगम्यः
b. श्रुतिगम्यः
c. मानसप्रत्यक्षगम्यः
d. अर्थापत्तिगम्यः

35. आत्मा अहंप्रत्ययगम्यः भवतीति के अभिप्रयन्ति?
a. अद्वैतवेदान्तिनः
b. नैय्यायिकाः
c. बौद्धाः
d. भाट्टमीमांसकाः

36. ज्ञानज्ञात्रोरेकत्वं मन्यमानाः के ?
a. शाङ्कराः
b. नैय्यायिकाः
c. द्वैतिनः
d. मीमांसकाः

37. 'आत्मानं जानीहि' इति प्रयोगात् 'आत्मा द्रष्टव्यः' इति श्रुतेश्च किमवगम्यत इति मीमांसकाः वदन्ति?
a. कर्तृकरणयोरैक्यम्
b. कर्तृकर्मणोरैक्यम्
c. कर्तृकरणयोर्भेदः
d. कर्तृकर्मणोर्भेदः

38. स च देहेन्द्रियज्ञानसुखेभ्यो व्यतिरिच्यते। कः?

a. प्राणः
b. आत्मा
c. दुःखः
d. पापः

39. न च ज्ञानमेवात्मा। कुतः?
a. प्रतीतिविरोधात्
b. ज्ञानस्य क्षणिकत्वात्
c. ज्ञान
d. स्याप्रत्यक्षत्वात्
e. ज्ञानान्तराधीत्वात्

40. यस्य मे पूर्वं सुखमासीत् तस्यैवेदानीं दुःखमनुवर्तत इत्यनुभवाते आत्मनः ............................. इति अवगम्यते।
a. सुखरूपत्वं नास्ति
b. दुःखरूपत्वं अस्ति
c. पूर्वं सुखमासीत्
d. अधुना दुःखं अस्ति

41. आत्मनः विज्ञानानन्दरूपत्वं के समर्थयन्ति?
a. बौद्धाः
b. सांख्याः
c. औपनिषदाः
d. नैय्यायिकाः

42. आत्मनः स्वप्रकाशत्वं के समर्थयन्ति?
a. प्राभाकराः
b. शाङ्कराः
c. नैय्यायिकाः
d. बौद्धाः

43. 'आत्मा ज्ञानान्तराधीनप्रकाशः व्यवहार्यत्वात् घटादिवत्' इत्यनुमानं किं समर्थयति?
a. आत्मनः ज्ञानस्वरूपाभावः
b. आत्मनः स्वप्रकाशत्वाभावः
c. आत्मनः ज्ञानस्वरूपत्वम्
d. आत्मनः व्यवहार्यत्वम्

44. मीमांसकमते 'विज्ञानमानन्दं ब्रह्म' इति वाक्यस्यार्थः कथं अङ्गीक्रियते?
a. कार्यार्थत्वेन
b. अखण्डार्थत्वेन
c. अर्थान्तरत्वेन
d. संसर्गापरपर्यायत्वेन

45. मीमांसकाभिप्रायेण 'प्रकृष्टप्रकाशश्चन्द्रः' इति वाक्यं अखण्डनिष्ठं न भवति। कुतः?
a. वाक्यस्य प्रकृष्टप्रकाशपदयोः भेदप्रतिपादकत्वात्
b. वाक्यस्य गुणगुणिनोः संसर्गप्रतिपादनपरत्वात्
c. वाक्यस्य प्रकृष्टप्रकाशपदयोरन्यार्थप्रतिपादनपरत्वात्
d. वाक्यस्य संज्ञासंज्ञिसम्बन्धप्रतिपादनपरत्वात्

46. 'विज्ञानमानन्दं ब्रह्म' इति श्रुतिवाक्यं मीमांसकमते किंविषयं भवति?
a. विज्ञानादिविशिष्टात्मस्वरूपविषयम्
b. आनन्दविशिष्टविज्ञानाश्रयविषयम्
c. ब्रह्मणः विज्ञानानन्दयोः भेदविषयम्
d. विज्ञानानन्दब्रह्मणां सामानाधिकरण्यविषयम्

47. मीमांसकाभिप्रायेण 'स एको ब्रह्मण आनन्दः','आनन्दं ब्रह्मणो विद्वान्' इतीमे श्रुती किं बोधयतः?
a. ब्रह्मणः आनन्दः एक एव इति

b. आनन्दब्रह्मणोः परस्परभेद इति
c. ब्रह्मानन्दवान् एव विद्वान् इति
d. ब्रह्मणः आनन्दः विज्ञानमेवेति

48. 'सुखमहमस्वाप्सं' इति सुषुप्तिसुखानुसन्धानं मीमांसकानां अभिप्रायेण कीदृशं भवति?
a. सुषुप्तौ ब्रह्मसुखानुभवप्रदर्शनपरम्
b. सुषुप्तिसुखस्य अहन्तायाश्च ऐक्यपरम्
c. स्वापस्य इन्द्रियसुखानुभवस्वरूनपरम्
d. सुषुप्तिसुखः अखिलदुःखनिवृत्तिमात्रपरः

49. सोयमात्मा सकलशरीरेष्वेक एवेति के वदन्ति?
a. सांख्याः
b. प्राभाकराः
c. नैय्यायिकाः
d. अद्वैतवेदान्तिनः

50. आत्मा सकलशरीरेषु एक एवेति मतं भाट्टैः नाङ्गीक्रियते। कुतः?
a. एकस्मिन् सुखिनि दुखिनि वा सर्वेषामापि सुखदुःखानुसन्धानप्रसङ्गात्।
b. योहमश्रौषं स एव पश्यामीत्याद्यनुसन्धानदर्शनात्।
c. आत्मव्यतिरिक्तजीवसद्भावे प्रमाणाभावात्।
d. सर्वैरप्येतैर्हेतुभिः।

51. जीवब्रह्मणोर्भेदः कल्पनानिर्मित एवेति अद्वैतिनां मतं न साधु। कुतः?
a. कल्पनानिर्मितस्य भेदस्य प्रामाणिकव्यवस्थाहेतुत्वानुपपत्तेः।
b. कल्पनानिर्मितो भेदः न व्यावहारिकावस्थायां प्रमाणमित्यतः।
c. कल्पनानिर्मितभेदस्य भ्रान्तिविषयत्वात् न श्रुतिभिः प्रतिपाद्येत इत्यतः।
d. सर्वैरप्येतैर्हेतुभिः।

52. आत्मनः परिमाणे मीमांसकानां मतं किम् ?
a. अणुपरिमाणः आत्मा
b. महत्परिमाणवान् आत्मा
c. मध्यमपरिमाणवान् आत्मा
d. विभुरात्मा

53. लौकिकेषु सुखदुःखेष्वेव स्वर्गनरकादिव्यपदेश इति के वदन्ति?
a. बौद्धाः
b. सांख्याः
c. चार्वाकाः
d. प्राभाकराः

54. निरुपधानस्य बोधसन्तानस्य स्वरूपेणावस्थानं मोक्ष इति केषां मतम् ?
a. बौद्धानाम्
b. वेदान्तिनाम्
c. भाट्टानाम्
d. तार्किकाणाम्

55. एकविंशतिप्रभेददुःखोच्छेदो मोक्ष इति केषामभिप्रायः?
a. सांख्यानाम्
b. सौगतानाम्
c. तार्किकाणाम्
d. योगिनाम्

56. प्राभाकराणां मोक्षलक्षणं किम् ?
a. जीवपरब्रह्मणोरेकीभावः।
b. तत्त्वज्ञानात् दुःखात्यन्तोच्छेदः।
c. प्रकृतेः पुरुषस्य विविच्यावबोधः।
d. बुद्ध्यादिविशेषगुणविलये सति आत्मनः स्वरूपावस्थानम्।

57. प्रपञ्चविलयो मोक्ष इति शाङ्करमतं न मीमांसकानां सङ्गतम् । कुतः?

a. प्रपञ्चविलयस्य अपुरुषार्थत्वात्।
b. प्रपञ्चविलय एव न भवतीत्यतः।
c. मोक्षस्य भोक्तुरभावः प्रसज्येतेत्यतः।
d. अभावस्य मोक्षविशेषणत्वप्रसङ्गात्।

58. भाट्टमीमांसकानां मते मुक्तिः कथं लक्षिता?
a. दुःखात्यन्तसमुच्छेदे सति सुखस्य मनसा भुक्तिः।
b. आत्मनः दुःखाभावत्वे सति आनन्दस्वरूपतावाप्तिः।
c. विज्ञानात्मपरमात्मनोः क्लेशात्यन्तोच्छेदे सति ऐक्यम्
d. तत्त्वज्ञानादात्मनः बहुत्वोच्छेदे सति एकत्वावाप्तिः।

59. दुष्कृतेः प्रध्वंसः कथम् ?
a. श्रौतस्मार्तविद्यासंपत्त्या।
b. नित्यनैमित्तिकप्रायश्चित्तकर्मानुष्ठानेन।
c. यागाद्यनुष्ठानेन
d. तपसा

60. प्रारब्धकर्मक्षयः कथं संभवति ?
a. तपसा
b. ब्रह्मचर्येण
c. सुखदुःखानुभूतिभ्याम्
d. योगविद्यया

61. सुखाद्यापरोक्षयसाधनं इन्द्रियं.........?
a. चक्षुः
b. मनः
c. अहनङ्कृतिः
d. त्वक्

62. मीमांसकानां मते मनः..............?
a. विभु
b. अणु
c. मध्यमपरिमाणवत्
d. तत्तच्छरीरपरिमाणवत्

63. शब्दो द्रव्यं साक्षादक्षसम्बन्धसाक्षात्कार्यत्वात् घटवत् इत्यनुमानं कस्य वादस्य निरासकम् ?
a. वियद्गुणः शब्द इति वादस्य
b. शब्दो नित्य इति वादस्य
c. शब्दो विभुरिति वादस्य
d. शब्दः निराश्रय इति वादस्य

64. मीमांसकमते शब्दस्य द्रव्यत्वनित्यत्वसर्वगतत्वादयः.........?
a. सिद्धाः
b. असिद्धाः
c. सन्दिग्धाः
d. विकल्पिताः

65. भाट्टमते शब्दो द्विविधः। कथम् ?
a. नित्यो अनित्यश्चेति।
b. वाचकः अवाचकश्चेति।
c. उपलब्धो अनुपलब्धश्चेति।
d. इन्द्रियग्राह्यो अनिन्द्रियग्राह्यश्चेति।

66. कीदृशानां शब्दानां समाहारं पदं प्राहुः?
a. भिन्नार्थवाचिनाम्
b. एकार्थवाचिनाम्
c. नानार्थवाचिनाम्
d. अन्यार्थवाचिनाम्

67.शब्दस्यानित्यत्वोक्तिः मीमांसकैरसह्यम्। कुतः?

a. श्राव्यत्वाभावप्रसङ्गात्
b. निरर्थकजिह्वाव्यापारप्रसङ्गात्
c. वेदानामनित्यत्वप्रसङ्गात्
d. शास्त्रवैय्यर्थ्यप्रसङ्गात्

68.व्यक्तिगता नित्या प्रत्यक्षज्ञानगोचरा भिन्नाभिन्ना च ............?

a. श्रुतिः
b. बुद्धिः
c. जातिः
d. प्रकृतिः

69.जातिः व्यक्तौ कथं अनुभूयते?

a. व्यङ्ग्यभावेन
b. व्यञ्जकभावेन
c. कारणत्वेन
d. कार्यत्वेन

70.चतुर्विंशतिविधः कः?

a. आत्मा
b. विशेषः
c. सुखः
d. गुणः

71.मानव्यवहारकारणं सर्वद्रव्यगतं सामान्यगुणः................?

a. रूपः
b. संख्या
c. परिमाणः
d. विभागः

72.पृथक्त्वं नाम...........?

a. मानव्यवहारकारणम्
b. एकत्वादिव्यवहारकारणम्
c. भेदव्यवहारकारणम्
d. सामान्यव्यवहारकारणम्

73.स्थाणुश्येनयोः संयोगः...............?

a. उभयकर्मजः
b. अन्यतरकर्मजः
c. संयोगजः
d. असंयोगजः

74.अर्थप्रकाशापरनामधेयप्राकट्यान्यथानुपपत्तिप्रसूतार्थापत्तिगम्या का?

a. इच्छा
b. बुद्धिः
c. श्रुतिः
d. प्रज्ञा

75.यदधीनं व्यवहारानुगुणत्वं तत् ..........?

a. अजडं
b. जडं
c. सामान्यं
d. इन्द्रियं

76.शक्तित्वसामान्यवती द्रव्यकर्मगुणाश्रया..........

a. शक्तिः
b. बुद्धिः
c. माया

d. जातिः

77. कर्म ........द्रव्यमात्रस्थम्।
   a. नित्य
   b. विभु
   c. अविभु
   d. अनित्य
78. कर्मसिद्धिः..........
   a. प्रत्यक्षेण
   b. अनुमानेन
   c. मनसा
   d. असंभवा
79. अभावाख्यः पदार्थः नास्ति इति के वदन्ति?
   a. तार्किकाः
   b. बौद्धाः
   c. प्राभाकराः
   d. जैनाः
80. विवादपदं विशेषणविशेष्यभावसम्बन्धनिबन्धनं विशिष्टज्ञानत्वात् इत्यनुमाने विवादपदं किम् ?
   a. द्रव्यं
   b. अभावः
   c. संयोगः
   d. आत्मा
81. मुख्यो माध्यमिको विवर्तमखिलं..........मेने जगत् ?
   a. चेतसः
   b. चित्तस्य
   c. शून्यस्य
   d. भावस्य
82. प्रपञ्चो मिथ्या दृश्यत्वात् स्वप्नप्रपञ्चवत् इत्यनुमानप्रयोगे भाट्टैः को वा दोषः आरोप्यते?
   a. बाधितविशेषणत्वम्
   b. अप्रसिद्धविशेषणत्वम्
   c. व्यर्थविशेष्यासिद्धः
   d. सिद्धविशेषणत्वम्

Answer Key

| | | | | | |
|---|---|---|---|---|---|
| 1 | A | 29 | B | 57 | B |
| 2 | C | 30 | D | 58 | A |
| 3 | A | 31 | A | 59 | B |
| 4 | D | 32 | B | 60 | C |
| 5 | B | 33 | D | 61 | B |
| 6 | C | 34 | C | 62 | A |
| 7 | B | 35 | A | 63 | A |

| | | | | | |
|---|---|---|---|---|---|
| 8 | D | 36 | A | 64 | A |
| 9 | B | 37 | B | 65 | B |
| 10 | C | 38 | B | 66 | B |
| 11 | A | 39 | B | 67 | C |
| 12 | A | 40 | A | 68 | C |
| 13 | B | 41 | A | 69 | B |
| 14 | C | 42 | B | 70 | D |
| 15 | B | 43 | B | 71 | C |
| 16 | A | 44 | D | 72 | C |
| 17 | B | 45 | D | 73 | B |
| 18 | C | 46 | A | 74 | B |
| 19 | B | 47 | B | 75 | A |
| 20 | C | 48 | D | 76 | A |
| 21 | A | 49 | D | 77 | C |
| 22 | A | 50 | D | 78 | A |
| 23 | B | 51 | A | 79 | C |
| 24 | D | 52 | D | 80 | B |
| 25 | C | 53 | C | 81 | C |

| | | | | | |
|---|---|---|---|---|---|
| 26 | D | 54 | A | 82 | b |
| 27 | C | 55 | C | | |
| 28 | a | 56 | D | | |